१२७ संस्कृत

याज्ञिक
स्मार्त

अ.नं.१८

# पुरुषसूक्तन्यासः

३पाने

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥श्रीगणेशाय नमः॥ पुरुषसूक्तन्यासप्रारं
भः॥ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः
सहस्रपात्॥ स भूमिं विश्वतो वृत्वात्यतिष्ठ
द्दशांगुलं॥१॥ वामकराय नमः॥ ॐ पुरु
ष एवेदं सर्वं यद्भूतं यच्च भव्यं॥ उतामृतत्वस्ये
शानो यदन्नेनातिरोहति॥ दक्षिणकराय
नमः॥ ॐ एतावानस्य महिमातो ज्यायां
श्च पूरुषः॥ पादोस्य विश्वा भूतानि त्रिपा
दस्यामृतं दिवि॥ वामपादाय नमः॥ ॐ

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

१ त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥
ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥
दक्षिणपादायनमः ॥ ॐ म् तस्माद्विराळ
जायतविराजोअधिपूरुषः ॥ सजातोअत्य
रिच्यतपश्चाद्भूमिमथोपुरः ॥५॥ वामजान
वेनमः ॥ ॐ म् यत्पुरुषेणहविषादेवायज्ञ
मतन्वत ॥ वसंतोअस्यासीदाज्यंग्रीष्म
इध्मःशरद्धविः ॥ दक्षिणजानवेनमः ॥
ॐ म् तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजा ॥ १

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तमग्रतः॥ तेनदेवाअयजंतसाध्याऋष
यश्चये॥ वामकुक्ष्ये नमः॥ ॐ मू तस्माद्यज्ञा
त्सर्वहुतः संभृतंपृषदाज्यं॥ पशूंस्तांश्चक्रे
वायव्यानारण्यान्ग्राम्याश्चये॥ दक्षिणकु
क्ष्येनमः॥ ॐ मू तस्माद्यज्ञात्सर्वहुतऋचः
सामानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्माद्य
जुस्तस्मादजायत॥ नाभ्यैनमः॥ ॐ मू त
स्मादश्वाअजायंतयेकेचोभयादतः॥
गावोहजज्ञिरेतस्मा तस्माज्जाताअजा

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

२ वयः ॥ हृदयाय नमः ॥ २ ॥ ॐ मं यत्पुरुषं
व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्य
कौ बाहू का उरू पादा उच्यते । कंठाय नमः ॥ ॐ
मं ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजाय
त । वामबाहवे नमः ॥ ॐ मं चंद्रमा मनसो
जातश्चक्षोः सूर्यो अजायत ॥ मुखादिंद्रश्चा
ग्निश्च प्राणाद्वायुरजायत । दक्षिणबाह
वे नमः ॥ ॐ मं नाभ्या आसीदंतरिक्षं शी २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

द्यौ द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रो
त्रात्तथा लोकां अकल्पयन् ॥ मुखाय नमः ॥
ॐ सप्तास्यासन्परिधयः त्रिः सप्त समि
धः कृताः ॥ देवा यद्यज्ञं तन्वाना अबध्नन्पु
रुषं पशुं ॥ नेत्राभ्यां नमः ॥ ॐ यज्ञेन यज्ञ
मयजंत देवास्तानि धर्माणि प्रथमा
न्यासन् ॥ ते ह नाकं महिमानः सचंत य
त्र पूर्वे साध्याः संति देवाः ॥ शिरसे स्वाहा ॥
॥ इति पुरुषसूक्तन्यास समाप्तः ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com